ध्राड़िः, पुं, (ध्राड़्ते शीर्णो भवतीति । ध्राड़+
"सर्व्वधातुभ्य इन् ।" उणां ।४।११८। इति इन् ।)
पुष्पचयः । इत्युणादिकोषः ॥
ध्रिज, गतौ । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-
सेट् ।) ध्रेजति । इति दुर्गादासः ॥
ध्रु, ञि } स्थैर्य्ये । सर्पणे । इति कविकल्पद्रुमः ॥
ध्रु, शि } (भ्वां-तुदां च-स्थैर्य्ये अकं-सर्पणे सकं-
परं-अनिट् ।) द्वौ रेफयुक्तौ । आद्यो दीर्घान्त
इति कश्चित् । ञि, ध्रुतोऽस्ति । शि, ध्रुवति
अध्रुवीत् । ध्रुवति शैलः । इति दुर्गादासः ॥
ध्रुवं, क्ली, (ध्रुवति स्थिरीभवतीति । ध्रु+"ध्रुवः
कः ।" उणां । २ । ६१ । इत्यत्र । "बाहुलकात्
ध्रु स्थैर्य्ये अतोऽपि कः ।" इत्युज्ज्वलदत्तोक्त्या
कः ।) निश्चितम् । (यथा, शाकुन्तले १
अङ्के ।
"ध्रुवं स नीलोत्पलपत्रधारया
शमीलतां छेत्तुमृषिर्व्यवस्यति ॥")
तर्कः । इति मेदिनी । वे, १३ ॥ आकाशम् ।
इति हेमचन्द्रः ॥
ध्रुवं, त्रि, (ध्रु गतिस्थैर्य्ये+बाहुलकात् कः ।)
सन्ततम् । शाश्वतम् । इति मेदिनी । वे, १३ ॥
स्थिरम् । निश्चितम् । इति हेमचन्द्रः ।६।८६ ॥
(यथा, चाणक्यशतके । ६३ ।
"यो ध्रुवाणि परित्यज्य अध्रुवाणि निषेवते ।
ध्रुवाणि तस्य नश्यन्ति अध्रुवं नष्टमेव हि ॥")
ध्रुवः, पुं, (ध्रुवति स्थिरीभवतीति । ध्रु+बाहुलकात्
कः ।) शङ्कुः । हरः । (यथा, महाभारते ।
१३ । १७ । १०३ ।
"धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः ॥")
विष्णुः । (यथा, महाभारते । १३ ।१४९।२९ ।
"विश्वकर्म्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः ॥")
वटः । उत्तानपादजः । (अस्य विवरणन्तु
पश्चात् द्रष्टव्यम् ॥) वसुभेदः । (यथा, मात्स्ये ।
५ । २१ ।
"आपो ध्रुवश्च सोमश्च धरश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥")
योगभेदः । इति मेदिनी । वे, १३ ॥ (यथा,
ज्योतिषे ।
"गण्डो वृद्धिर्ध्रुवश्चैव व्याघातो हर्षणस्तथा ॥")
स्थाणुः । इत्यमरः । २ । ४ । ८ ॥ शरारि-
पक्षी । इति त्रिकाण्डशेषः ॥ ध्रुवकः । इति
सङ्गीतदामोदरः ॥*॥ (रोहिणीगर्भे वसुदेवा-
ज्जातः पुत्त्रविशेषः । यथा, भागवते ।९।२४।४६।
"बलं गदं सारणञ्च दुर्म्मदं विपुलं ध्रुवम् ।
वसुदेवस्तु रोहिण्यां कृतादीनुदपादयत् ॥"
पाण्डवपक्षीयः कश्चित् क्षत्त्रियवीरः । इति
महाभारते । ७ । १५६ । ३७ ॥ नहुषस्य पुत्त्र-
विशेषः । यथा, महाभारते । १ । ७५ । ३० ।
"यतिं ययातिं संयातिमायातिमयतिं ध्रुवम् ।
नहुषो जनयामास षट् सुतान् प्रियवाससि ॥"
पुरुवंशीयरन्तिनावस्य पुत्त्रविशेषः । यथा,
भागवते । ९ । २० । ६ ।
"ऋतेयो रन्तिनावोऽभूत् त्रयस्तस्यात्मजा नृप ! ।
सुमतिर्ध्रुवोऽप्रतिरथः कण्वोऽप्रतिरथात्मजः ॥"
रोमावर्त्तविशेषः । यथा, शब्दार्थचिन्तामणौ ।
"आवर्त्तसाम्यादावर्त्तो रोमसंस्थानमङ्गिनाम् ॥"
ते च दशधा यथा,—
"द्वावुरस्यौ शिरस्यौ द्वौ द्वौ द्वौ रन्ध्रोप-
रन्ध्रयोः ।
एको भाले ह्यपाने च दशावर्त्ता ध्रुवाः
स्मृताः ॥"
यज्ञीयग्रहपात्रविशेषः । यथा, कात्यायनश्रौत-
सूत्रे । ९ । ५ । १७ ।
"यजमानस्ततो ग्रहग्रहणमा ध्रुवात् ॥")
नासाग्रम् । तत्तु आसन्नमृत्युर्न पश्यति । यथा,
"अरुन्धतीं ध्रुवञ्चैव विष्णोस्त्रीणि पदानि च ।
आसन्नमृत्युर्नो पश्येच्चतुर्थं मातृमण्डलम् ॥
अरुन्धती भवेज्जिह्वा ध्रुवो नासाग्रमुच्यते ।
विष्णोः पदानि भ्रूमध्ये नेत्रयोर्म्मातृमण्डलम् ॥"
इति काशीखण्डे । १२ । १३—१४ ॥
ध्रुवलोकोत्पत्तिर्यथा,—
"प्रियव्रतोत्तानपादौ मनोः स्वायम्भुवस्य तु ।
द्वौ पुत्त्रौ सुमहावीर्य्यौ धर्म्मज्ञौ कथितौ तव ॥
तयोरुत्तानपादस्य सुरुच्यामुत्तमः सुतः ।
अभीष्टायामभूद्ब्रह्मन् ! पितुरत्यन्तवल्लभः ॥
सुनीतिर्नाम या राज्ञस्तस्याभून्महिषी द्विज ! ।
स नातिप्रीतिमांस्तस्यां तस्याश्चाभूद्ध्रुवः सुतः ॥
राजासनस्थितस्याङ्कं पितुर्भ्रातरमाश्रितम् ।
दृष्ट्वोत्तमं ध्रुवश्चक्रे तमारोढुं मनोरथम् ॥
सपत्नीतनयं दृष्ट्वा तमङ्कारोहणोत्सुकम् ।
पुत्त्रं पितुस्तथारूढं सुरुचिर्वाक्यमब्रवीत् ॥
एतद्राजासनं सर्व्वभूभृत्संश्रयकेतनम् ।
योग्यं ममैव पुत्त्रस्य किमात्मा क्लिश्यते त्वया ॥
उत्सृज्य पितरं बालस्तत् श्रुत्वा मातृभाषितम् ।
जगाम कुपितो मातुर्निजाया द्विज ! मन्दिरम् ॥
तं दृष्ट्वा कुपितं पुत्त्रमीषत्प्रस्फुरिताधरम् ।
सुनीतिरङ्कमारोप्य मैत्रेयेदमभाषत ॥
वत्स ! कः कोपहेतुस्ते कश्च त्वां नाभिनन्दति ।
कोऽवजानाति पितरं तव यस्तेऽपराध्यति ॥
इत्युक्तः सकलं मात्रे कथयामास तद्यथा ।
सुरुचिः प्राह भूपालप्रत्यक्षमतिगर्व्विता ॥
सुनीतिरुवाच ।
सुरुचिः सत्यमाहेदं स्वल्पभाग्योऽसि पुत्त्रक ! ।
न हि पुण्यवतां वत्स ! सपत्नैरेवमुच्यते ॥
यदि ते दुःखमत्यर्थं सुरुच्या वचनात्तव ।
तत् पुण्योपचये यत्नं कुरु सर्व्वफलप्रदे ॥
पराशर उवाच ।
निर्जगाम गृहान्मातुरित्युक्त्वा मातरं ध्रुवः ।
पुराच्च निर्गम्य ततस्तद्बाह्योपवनं ययौ ॥
स ददर्श मुनींस्तत्र सप्त पूर्व्वागतान् ध्रुवः ।
निर्जगाम वनात्तस्मात् प्रणिपत्य स तानृषीन् ॥
मधुसंज्ञं महापुण्यं जगाम यमुनातटम् ।
यत्रैव देवदेवस्य सान्निध्यं हरिमेधसः ॥
सर्व्वपापहरे तस्मिन् तपस्तीर्थे चकार सः ।
पदाङ्गुष्ठेन संपीड्य यदा च वसुधां स्थितः ।
तदा समस्तवसुधा चचाल सह पर्व्वतैः ॥
भगवानपि सर्व्वात्मा तन्मयत्वेन तोषितः ।
गत्वा ध्रुवमुवाचेदं चतुर्भुजवपुर्हरिः ॥
औत्तानपादे भद्रन्ते तपसा परितोषितः ।
वरदोऽहमनुप्राप्तो वरं वरय सुव्रत ! ॥
ध्रुव उवाच ।
भगवन् सर्व्वभूतेश ! सर्व्वस्यास्ते भवान् हृदि ।
किमज्ञातं तव स्वामिन् ! मनसा यन्मयेप्सितम् ॥
नैतद्राजासनं योग्यमजातस्य ममोदरात् ।
इति गर्व्वादवोचन्मां सपत्नी मातुरुच्चकैः ॥
आधारभूतं जगतः सर्व्वेषामुत्तमोत्तमम् ।
प्रार्थयामि प्रभो ! स्थानं त्वत्प्रसादादतोऽव्ययम् ॥
श्रीभगवानुवाच ।
त्रैलोक्यादधिके स्थाने सर्व्वताराग्रहाश्रयः ।
भविष्यति न सन्देहो मत्प्रसादाद्भवान् ध्रुव ! ॥
सूर्य्यात् सोमात् तथा भौमात् सोमपुत्त्राद्बृह-
स्पतेः ।
सितार्कतनयादीनां सर्व्वर्क्षाणां तथा ध्रुवम् ॥
सप्तर्षीणामशेषाणां ये च वैमानिकाः सुराः ।
सर्व्वेषामुपरि स्थानं तव दत्तं मया ध्रुव ! ॥"
इति विष्णुपुराणे १ अंशे ११ अध्यायः ॥*॥
ध्रुवयोगजातफलं यथा,—
"नरीनर्त्ति वाणी सदा वक्त्रपद्मे
चरीकर्त्ति कार्य्यं वरीभर्त्ति बन्धून् ।
ध्रुवाख्ये प्रसूतिर्ध्रुवा यस्य कीर्त्ति-
र्दिगन्ते नितान्तं भवेच्चारुमूर्त्तेः ॥"
इति कोष्ठीप्रदीपः ॥ * ॥
ध्रुवगणो यथा । उत्तरफल्गुनी १ उत्तराषाढ़ा
२ उत्तरभाद्रपद् ३ रोहिणी ४ । इति ज्योति-
षम् ॥ * ॥ ताराविशेषः । यथा,—
"मेरोरुभयतो मध्ये ध्रुवतारे नभःस्थिते ।
निरक्षदेशसंस्थानामुभये क्षितिजाश्रिते ॥
भचक्रं ध्रुवयोर्बद्धमाक्षिप्तं प्रवहानिलैः ।
पर्य्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम् ॥"
इति सूर्य्यसिद्धान्ते १२ अध्यायः ॥
ध्रुवकः, पुं, (ध्रुव+स्वार्थे कन् ।) स्थाणुः । इति
हेमचन्द्रः । ४ । १८८ ॥ गीताङ्गविशेषः । ध्रुया
इति भाषा । तस्य लक्षणं यथा,—
"उत्तमः षट्पदः प्रोक्तो मध्यमः पञ्चमः स्मृतः ।
कनिष्ठश्च चतुर्भिः स्याद्ध्रुवकोऽयं मयोदितः ॥
उक्तं द्विखण्डमुद्ग्राहे द्विखण्डं ध्रुवके मतम् ।
ततो द्विखण्डमाभोगे तालमानरसैः सह ॥
आभोगे कविनाम स्यात्तथा नायकनाम च ।
उद्ग्राहं प्रथमं गीत्वा ध्रुवं गायेत्ततः परम् ॥
ततोऽन्तरा ध्रुवस्तस्मादाभोगध्रुवकौ ततः ।
उद्ग्राहः प्रथमः पादः कथितः पूर्व्वसूरिभिः ॥
गीत्वा पूर्व्वपदं न्यासो यत्र स ध्रुवको मतः ।
यत्रैव कविनाम स्यात् स आभोग इतीरितः ॥
ध्रुवकादिषु सर्व्वेषु भवेदेवंविधः क्रमः ॥"
स तु षोड़शविधः । यथा,—
"जयन्तः शेखरोत्साहौ मधुरो निर्म्मलस्तथा ।